श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीपराशरभट्टार्यैरनुगृहीतम्

# ॥ श्रीरङ्गनाथस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरङ्गनाथस्तोत्रम् ॥

श्रीपराशर भट्टार्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे॥

सप्तप्राकारमध्ये सरसिजमुकुलोद्भासमाने विमाने
कावेरीमध्यदेशे मृदुतरफणिराड्भोगपर्यङ्कभागे।
निद्रामुद्राभिरामं कटिनिकटशिरःपार्श्वविन्यस्तहस्तं
पद्माधात्रीकराभ्यां परिचितचरणं रङ्गराजं भजेऽहम्॥ 1॥

कस्तूरीकलितोर्ध्वपुण्ड्रतिलकं कर्णान्तलोलेक्षणं
मुग्धस्मेरमनोहराधरदळं मुक्ताकिरीटोज्ज्वलम्।
पश्यन्मानसपश्यतोहररुचः पर्यायपङ्केरुहं
श्रीरङ्गाधिपतेः कदा नु वदनं सेवेय भूयोऽप्यहम्॥ 2॥

कदाऽहं कावेरीतटपरिसरे रङ्गनगरे
शयानं भोगीन्द्रे शतमखमणिश्यामलरुचिम्।
उपासीनः क्रोशन् मधुमथन! नारायण! हरे!
मुरारे! गोविन्देत्यनिशमनुनेष्यामि दिवसान्॥ 3॥

कदाऽहं कावेरीविमलसलिले वीतकलुषो
भवेयं तत्तीरे श्रममुषि वसेयं घनवने।
कदा वा तत् पुण्ये महति पुळिने मङ्गळगुणं
भजेयं रङ्गेशं कमलनयनं शेषशयनम्॥ 4॥

पूगीकण्ठद्वयससरसस्निग्धनीरोपकण्ठां
आविर्मोदस्तिमितशकुनानूदितब्रह्मघोषाम्।
मार्गेमार्गे पथिकनिवहैरुञ्छ्यमानापवर्गां
पश्येयं तां पुनरपि पुरीं श्रीमतीं रङ्गधाम्नः॥ 5॥

न जातु पीतामृतमूर्च्छितानां
नाकौकसां नन्दनवाटिकासु।
रङ्गेश्वर त्वत्पुरमाश्रितानां
रथ्याशुनामन्यतमो भवेयम्॥ 6॥

श्रीरङ्गं करिशैलमञ्जनगिरिं ताक्ष्याद्रिसिंहाचलौ
श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम्।
श्रीमद्द्वारवतीप्रयागमथुरायोध्यागयाः पुष्करं
सालग्रामगिरिं निषेव्य रमते रामानुजोऽयं मुनिः॥ 7॥

असन्निकृष्टस्य निकृष्टजन्तोः
मिथ्यापवादेन करोषि शान्तिम्।
ततो निकृष्टे मयि सन्निकृष्टे
कां निष्कृतिं रङ्गपते करोषि॥ 8॥

॥ इति श्रीरङ्गनाथस्तोत्रं समाप्तम्॥